শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীকুমারৱরদদেশিক ৱিরচিতম্

# ॥ শ্রীমদ্ৱেদান্তদেশিক প্রার্থনাষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমদ্বেদান্তদেশিক প্রার্থনাষ্টকম্ ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি ॥

শ্রীমল্লক্ষ্মণ যোগীন্দ্র সিদ্ধান্ত ৱিজযধ্ৱজম্।
ৱিশ্ৱামিত্র কুলোদ্ভূতং ৱরদার্যমহং ভজে ॥

ত্রযীচূডাগুরো স্ৱামিন্ কৃপাম্ভোরাশিনা ৎৱযা।
ৱিজ্ঞাপনং মামকীনং শ্রোতৱ্যং শ্রিতৱৎসল ॥ **1** ॥

ত্রয্যন্তার্য ভৱৎপাদ পঙ্কেরুহজুষাং সতাম্।
স্ৱযং মযি সদা ভূযাদনুগ্রহপরম্পরা ॥ **2** ॥

শ্রীসংযমীন্দ্র সিদ্ধান্ত নিধিরক্ষৈকদীক্ষিত।
নিযতং কুরু দাসং মাং সর্ৱতন্ত্রস্ৱতন্ত্র তে ॥ **3** ॥

জ্ঞানভক্ত্যাদি সৎসম্পৎ প্রদাযিন্যাঽনুকম্পযা।
স্যাদসাৱিতি ৱীক্ষস্ৱ ৱেদান্তাচার্যৱর্য মাম্ ॥ **4** ॥

শ্রী ৱেঙ্কটেশঘণ্টাত্মন্ যতীন্দ্রশঠজিৎপ্রিয।
রহস্যত্রযসারোক্তনিষ্ঠাং শ্রেষ্ঠাং প্রযচ্ছ মে ॥ **5** ॥

ৎৱৎকৃতিষ্ৱাগমান্তার্য সম্যক্কৃতপরিশ্রমৈঃ।
নিত্যযোগো মহাভাগৈঃ ৎৱদেকান্তিভিরস্তু নঃ ॥ **6** ॥

কদাপি ক্ৱাপি কেনাপি কৱিতার্কিকসিংহ মাম্।
শ্রীকান্ততৎপরাচার্যেষ্ৱপ্রসক্তাগসং কুরু ॥ **7** ॥

শ্রীমদ্বেঙ্কটনাথার্য ৎৱদীযচরণদ্বযম্।
ভৱৎৱত্র পরত্রাপি মদীযং শরণং সদা॥ **8**॥

সাদরং ৱ্যাহরন্নেতৎ প্রত্যহং প্রার্থনাষ্টকম্।
ৱেদান্তাচার্যপাদাব্জ ভক্তিরত্নাকরো ভৱেৎ॥ **9**॥

জযতি শ্রুতিচূডার্যঃ শ্রীমানদ্ভুতচন্দ্রমাঃ।
সকলা যত্র হি কলাঃ নির্মলা নিত্যপুষ্কলাঃ॥ **10**॥

॥ ইতি শ্রীমদ্বেদান্তদেশিক প্রার্থনাষ্টকং সমাপ্তম্॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ॥